"परान्नं परवासञ्च नित्यं धर्म्मरतस्त्यजेत् ।"
इति स्मृतिः ॥

संयमदिने तस्य त्याज्यत्वं यथा,—
"कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"*॥
पारणदिने तस्य त्याज्यत्वं यथा,—
"अभ्यङ्गञ्च परान्नञ्च तैलं निर्म्माल्यलङ्घनम् ।
तुलसीचयनं द्यूतं पुनर्भोजनमेव वा ॥
वस्त्रपीड़ां तथा चारं द्वादश्यां वर्ज्जयेद्बुधः ॥"*॥
तद्भोक्तुर्यागादेर्विफलत्वं यथा,—
"परपाकेन पुष्टस्य द्विजस्य गृहमेधिनः ।
इष्टं दत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत् ॥"*॥
तद्भुक्ता पुत्त्रोत्पादने दोषो यथा,—
"यस्यान्नेन तु भुक्तेन भार्य्यां समधिगच्छति ।
यस्यान्नं तस्य ते पुत्त्रा अन्नाद्रेतः प्रवर्त्तते ॥"*॥
ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—
"ब्राह्मणान्नेन दारिद्र्यं क्षत्त्रियान्नेन प्रेष्यताम् ।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेनरकं व्रजेत् ॥"
इत्येकादशीतत्त्वम् ॥*॥
परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—
"षोड़शांशं स लभते यः परान्नेन गच्छति ।
अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"
इति प्रायश्चित्ततत्त्वम् ॥*॥
महागुरुनिपाते तस्य त्याज्यत्वं यथा,—
"अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।
वर्ज्जयेद्गुरुपाते तु यावत् पूर्णो न वत्सरः ॥"
इति शुद्धितत्त्वम् ॥*॥
तद्भोक्तुर्मन्त्रसिद्धिहानिर्यथा,—
"जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरानने ! ॥"
इति तन्त्रम् ॥*॥
तद्भोजने प्रतिप्रसवो यथा,—
"गुर्व्वन्नं मातुलान्नं वा श्वशुरान्नं तथैव च ।
पितुः पुत्त्रस्य चैवान्नं न परान्नमिति स्मृतिः ॥"
इत्येकादशीतत्त्वम् ॥

परान्नः, त्रि, (परान्नं नित्यमस्यास्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) परान्नोपजीवी । तत्पर्य्यायः । परपिण्डादः २ । इत्यमरः । ३ । १ । २० ॥

परापं, त्रि, (परागता आपो यस्मात् । "अवर्णान्ताद्वा ।" ६ । ३ । ९७ । इत्यस्य वार्त्ति इत्यनेन पक्षे अप ईदभावः ।) पक्षे ईत्वे परेपम् । इति सिद्धान्तकौमुदी ॥

परापरं, क्ली, (परमापिपर्त्ति । आ + पॄ + अच् ।) परूषकम् । इति भावप्रकाशः ॥ (अस्य विवरणं परूषशब्दे ज्ञातव्यम् ॥ परञ्चापरञ्च इयोः समाहारः ।) परमपरञ्च ॥ (यथा, विष्णुपुराणे । १।६।२७ ।
"एताश्च सह यज्ञेन प्रजानां कारणं परम् ।
परापरविदः प्राज्ञास्ततो यज्ञान् वितन्वते ॥")

परापरगुरुः, पुं, (परमादपि परः श्रेष्ठः परापरः । पृषोदरादित्वात् साधुः ततः कर्म्मधारयः ।) गुरुविशेषः । स तु भगवती । (यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठी त्वहं गुरुः ॥"
इति बृहन्नीलतन्त्रे २ पटलः ॥
(तन्त्रान्तरे च यथा,—
"मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुस्त्वं हि परमेष्ठिगुरुस्त्वहम् ॥")

पराभवः, पुं, (पराभूयते इति पराभवनमित्यर्थः । परा + भू + भावे अप् ।) तिरस्कारः । (यथा, मार्कण्डेये । १८ । २८ ।
"मद्यासक्तोऽहमुच्छिष्टो नचैवाहं जितेन्द्रियः ।
कथमिच्छथ मत्तोऽपि देवाः शत्रुपराभवम् ॥")
अस्य पर्य्यायः । न्यक्कारः २ तिरस्क्रिया ३ परिभावः ४ विप्रकारः ५ परिभवः ६ अभिभवः ७ अत्याकारः ८ निकारः ९ । इति हेमचन्द्रः ॥ विनाशः । इति मेदिनी ॥

पराभूतः, त्रि, (पराभूयते स्म । परा + भू + क्त ।) पराजितः । इत्यमरः । २ । ८ । ११२ ॥

परामर्शः, पुं, (परामृश्यते इति । परामर्शनमित्यर्थः । परा + मृश् + भावे घञ् ।) युक्तिः । विवेचनम् । तत्पर्य्यायः । वितर्कः २ ऊहनम् ३ विमर्शनम् ४ अध्याहारः ५ तर्कः ६ ऊहः ७ । इति हेमचन्द्रः ॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम् । यथा,—
"व्याप्यस्य पक्षधर्म्मत्वधीः परामर्श उच्यते ॥"
इति भाषापरिच्छेदः ॥
अस्यार्थः "व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितिजनकम् । तच्च व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवान् इति ज्ञानं वा ।" इति सिद्धान्तमुक्तावली ॥ स चानुमितव्यापारः । यथा,—
"व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥"
इति भाषापरिच्छेदः ॥
अस्यार्थः । "अनुमायामनुमितौ व्याप्तिज्ञानं कारणं परामर्शो व्यापारः । तथा हि । येन पुरुषेण महानसादौ धूमे वह्निर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्व्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते ।" इति सिद्धान्तमुक्तावली ॥

परामृतं, क्ली (परममृतं वारि यस्मात् ।) वर्षणम् । इति त्रिकाण्डशेषः ॥ (परममृतं अमरणधर्म्मकं ब्रह्मात्मभूतं यस्य । इति विग्रहे वाच्यलिङ्गः । यथा, मुण्डकोपनिषदि । ३ । २ । ६ ।
"वेदान्तविज्ञानसुनिश्चितार्थाः
सन्न्यासयोगात् यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्व्वे ॥")

परामृष्टः, त्रि, (परामृश्यते स्म । परा + मृश् + कर्म्मणि क्तः ।) सम्बन्धः । सम्बन्धयुक्तः । यथा,—
"क्लेशकर्म्मविपाकाशयैरपरामृष्टः । इति कुसुमाञ्जलिकारिकाव्याख्याने रामभद्रः ॥ कृतपरामर्शः । विवेचितः ॥

परायणं, त्रि, आसङ्गवचनम् । इत्यमरः । ३ । २ । २ ॥ परं केवलमयनमासक्तिस्थानमिति परायणम् । यथा धर्म्मपरायणो धर्म्मासक्तः । इति भरतः ॥ आश्रयः । (यथा, मनुः । ४ । १० ।
"वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ॥"
तत्परम् । अभीष्टम् । इति मेदिनी ॥ (नित्यप्रतिष्ठा । यथा, रामायणे । २ । ४८ । १७ ।
"पादच्छायासुखं भर्त्तुस्तादृशस्य महात्मनः ।
स हि नाथोऽजनस्यास्य स गतिः स परायणम् ॥"
"परायणं शाश्वतप्रतिष्ठा ।" इति रामानुजः ॥)

परायत्तं, त्रि, परस्य परेषां वा आयत्तम् ।) पराधीनम् । यथा,—
"तन्त्रायत्तवशाधीनच्छन्दवन्तः परात्परे ॥"
इति हेमचन्द्रः ॥

परारि, अ (पूर्व्वतरे वत्सरे इत्यर्थे "सद्यः परुत्परारीति ।" ५ । ३ । २२ । इति पूर्व्वतरस्य परभावः आरि च रवत्सरे ।) पूर्व्वतरवत्सरे । गतहृतीयवर्षे । इत्यमरभरतौ ॥ (परस्य अरिः ।) परशत्रौ त्रि ॥

परारिनः, त्रि, (परारि भवः । "चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ।" ४ । ३ । २३ । इत्यस्य वार्त्तिं इत्यनेन त्नः ।) पूर्व्वतरवत्सरसम्बन्धी । इति व्याकरणम् ॥

परारुः, पुं, (पराच्छ्र्तीति । परा + ऋ + उन् ।) कारवेल्लः । इति त्रिकाण्डशेषः ॥ (कारवेल्लशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

परारुकः, पुं, (पराच्छ्र्तीति । परा + ऋ + उकः ।) प्रस्तरः । इति त्रिकाण्डशेषः ॥

परार्द्धं क्ली,(परार्द्धमिति सर्व्वोत्कृष्टतया वर्द्धते इति । ऋध्यद्दर वृद्धौ + अप् ।) दशमध्यसंख्या । लक्षलक्षकोटिः । १००,०००,०००,०००,०००,००० इदं परमसंख्या अष्टादशाङ्कपर्य्यन्तम् । इति हेमचन्द्रः ज्योतिषञ्च ॥ (यथा, नैषधे । ३ । ४० ।
"यदि त्रिलोकीगणनापरा स्यात्
तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")
ब्रह्मण आयुषोऽर्द्धम् । यथा,—
"निजेन तस्य मानेन चायुर्व्वर्षशतं स्मृतम् ।
तत् पराख्यं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
इति कौर्म्मे ५ अध्यायः ॥
(तथा, मार्कण्डेये । ४६ । ४२—४३ ।
"शतं हि तस्य (ब्रह्मणः) वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्भिस्तथावर्षैः परार्द्धमिति कीर्त्त्यते ॥
एवमस्य परार्द्धन्तु अतीतं द्विजसत्तम ! ।
यस्यान्तेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः ॥")

परार्द्ध्यः, त्रि, (परार्द्धं परार्द्धसंख्यावत् प्रधानत्वमर्हतीति । परार्द्ध + यत् यद्वा परस्मिन्नर्द्धे भवः । "परावराधमोत्तमपूर्व्वाच्च ।" ४ । ३ । ५ । इति